# ऋग्वेद संहिता

अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म् । होता॑रं रत्न॒धात॑मम् १
अ॒ग्निः पूर्वे॑भि॒र्ऋषि॑भि॒रीड्यो॒ नूत॑नैरु॒त । स दे॒वाँ एह व॑क्षति २
अ॒ग्निना॑ र॒यिम॑श्नव॒त् पोष॑मे॒व दि॒वेदि॑वे । य॒शसं॑ वी॒रव॑त्तमम् ३ १.१

दश॑मे यु॒गे य॒तीनां॑ ब्र॒ह्मा भ॑वति॒ सार॑थिः । १.१५८.६

ऋ॒चो अ॒क्षरे॑ पर॒मे व्यो॑मन् यस्मि॑न् दे॒वा अधि॒ विश्वे॑ निषे॒दुः ।
यस्तन्न वेद॒ किमृ॒चा क॑रिष्यति॒ य इत् तद् वि॒दुस्त इ॒मे समा॑सते ॥ १.१६४.३९

दू॒रे॒दृशं॑ गृ॒हप॑तिमथ॒र्युम् । ७.१.१

स॒हस्र॑शीर्षा॒ पुरु॑ष १०.९०.१

य॑थापू॒र्वम॑कल्पयत् । १०.१९०.३

# सामवेद संहिता

२ ३ १ २ ३ १ २ ३ २ ३ १ २
१ अग्न आ याहि वीतये गृणानो हव्यदातये
१ २र ३ १ २
नि होता सत्सि बर्हिषि १

१ २ ३ २ ३ २ ३ १ २ ३ २
२ त्वमग्ने यज्ञाना३ँ होता विश्वेषा३ँ हितः
३ २ ३ १ २ ३ १ २
देवेभिर्मानुषे जने २

३ २ ३ १ २ ३ १ २ ३ १ २
३ अग्निं दूतं वृणीमहे होतारं विश्ववेदसम्
३ २ ३ १ २ ३ १ २
अस्य यज्ञस्य सुक्रतुम् ३